श्रीमते रामानुजाय नमः

# || श्रीरामानुजाष्टोत्तर शतनामस्तोत्रं ||

रामानुजः पुष्कराक्षो यतीन्द्रः करुणाकरः
कान्तिमत्यात्मजः श्रीमान् लीलामानुषविग्रहः ||१
सर्वशास्त्रार्थतत्वज्ञस्सर्वज्ञस्सज्ञनप्रियः
नारायणकृपापात्रं श्रीभूतपुरनायकः ||२
अनघो भक्तमंदारः केशवानन्दवर्धनः
काञ्चीपूर्णप्रियसखःप्रणतार्तिविनाशकः ||३
पुण्यसंकीर्तनः पुण्यो ब्रह्मराक्षसमोचकः
यादवापादितापार्थवृक्षच्छेदकुठारकः ||४
अमोघो लक्ष्मणमुनिश्शारदाशोकनाशनः
निरन्तरजनाज्ञाननिर्मोचनविचक्षणः ||५
वेदान्तद्वयसारज्ञो वरदाम्बुप्रदायकः
पराभिप्रायतत्वज्ञो यामुनाङ्गुळिमोचकः ||६
देवराजकृपालब्धषड्वाक्यार्थमहोदधिः
पूर्णार्यलब्धसन्मन्त्रश्शौरिपादाब्जषट्पदः ||७
त्रिदण्डधारी ब्रह्मज्ञो ब्रह्मध्यानपरायणः
रङ्गेशकैंकर्यरतो विभूतिद्वयनायकः || ८
गोष्ठीपूर्णकृपालब्धमन्त्रराजप्रकाशकः
वररङ्गानुकंपात्तद्राविडाम्नायपारगः || ९
मालाधरार्यसुज्ञातद्राविडाम्नायतत्त्वधीः
चतुस्सप्ततिशिष्याढ्यः पञ्चाचार्यपदाश्रयः || १०

प्रपीतविषतीर्थाम्भःप्रकटीकृतवैभवः
प्रणतार्तिहराचार्यदत्तभिक्षैकभोजनः || ११
पवित्रीकृतकूरेशो भागिनेयत्रिदण्डकः
कूरेशदाशरथ्यादि चरमार्थप्रकाशकः || १२
रङ्गेशवेंकटेशादिप्रकटीकृतवैभवः
देवराजार्चनरतो मूकमुक्तिप्रदायकः || १३
यज्ञमूर्तिप्रतिष्ठाता मन्नाथो धरणीधरः
वरदाचार्यसद्भक्तो यज्ञेशार्तिविनाशकः || १४
अनन्ताभीष्टफलदो विठलेशप्रपूजितः
श्रीशैलपूर्णकरुणा लब्धरामायणार्थकः || १५
प्रपत्तिधर्मैकरतो गोविन्दार्यप्रियानुजः
व्याससूत्रार्थतत्त्वज्ञो बोधायनमतानुगः || १६
श्रीभाष्यादिमहाग्रन्थकारकः कलिनाशनः
अद्वैतमतविच्छेत्ता विशिष्टाद्वैतपारगः || १७
कुरङ्गनगरीपूर्णमन्त्ररत्नोपदेशकः
विनाशिताखिलमतश्शेषीकृतरमापतिः || १८
पुत्रीकृतशठारातिश्शठजिद्दणमोचकः
भाषादत्तहयग्रीवो भाष्यकारो महायशाः || १९
पवित्रीकृतभूभागः कूर्मनाथप्रकाशकः
श्रीवेंकटाचलाधीशशङ्खचक्रप्रदायकः || २०
श्रीवेंकटेशश्वशुरश्श्रीरमासखदेशिकः
कृपामात्रप्रसन्नार्यो गोपिकामोक्षदायकः || २१
समीचीनार्यसच्छिष्यसत्कृतो वैष्णवप्रियः
क्रिमिकण्ठनृपध्वंसी सर्वमन्त्रमहोदधिः || २२

अङ्गीकृतान्ध्रपूर्णार्यस्सालिग्रामप्रतिष्ठितः
श्रीभक्तग्रामपूर्णेशो विष्णुवर्धनरक्षकः || २३
बौद्धध्वान्तसहस्रांशुश्शेषरूपप्रदर्शकः
नगरीकृतवेदाद्रिर्दिल्लीश्वरसमर्चितः || २४
नारायणप्रतिष्ठाता सम्पत्पुत्रविमोचकः
सम्पत्कुमारजनकस्साधुलोकशिखामणिः || २५
सुप्रतिष्ठितगोविन्दराजः पूर्णमनोरथः
गोदाग्रजो दिग्विजेता गोदाभीष्टप्रपूरकः || २६
सर्वसंशयविच्छेत्ता विष्णुलोकप्रदायकः
अव्याहतमहद्वर्त्मा यतिराजो जगद्गुरुः || २७
एवं रामानुजार्यस्य नाम्नामष्टोत्तरं शतम्
यः पठेच्छ्रुणुयाद्वापि सर्वान् कामानवाप्नुयात् || २८
यदान्ध्रपूर्णेन महात्मनेदं स्तोत्रं कृतं सर्वजनावनाय
तज्जीवभूतं भुवि वैष्णवानां बभूव रामानुजमानसानाम् || २९

श्रीदाशरथिकूरेशगोविन्दाचार्यसमेत श्रीरामानुजयतीन्द्राय नमः

## || श्रीरामानुजाष्टोत्तर शतनामस्तोत्रं ||

मण्डयं नायक रामानुजः